International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(4): 35-36
© 2024 IJSR
www.anantaajournal.com
Received: 11-04-2024
Accepted: 13-05-2024

**मौमिता हालदार:**
शोधार्थिनी, संस्कृतविभाग:, पाटलिपुत्र-विश्वविद्यालय:, पटना
सहायकप्राध्यापिका, संस्कृतविभाग:, पिंला थाना महाविद्यालय:, पश्चिमबंगाल:, भारत:

**Corresponding Author:**
**मौमिता हालदार:**
शोधार्थिनी, संस्कृतविभाग:, पाटलिपुत्र-विश्वविद्यालय:, पटना
सहायकप्राध्यापिका, संस्कृतविभाग:, पिंला थाना महाविद्यालय:, पश्चिमबंगाल:, भारत:

# बौद्धधर्मस्य प्रचार: प्रसार: च इत्येकमध्ययनम्

**मौमिता हालदार:**

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i4a.2416

**सारांशः**
बुद्धस्य जीवत्काले कोऽपि बौद्धधर्मसम्प्रदाय: नासीत् । परन्तु भगवत: महापरिनिर्वाणं पश्चात् बहव: सम्प्रदाया: सृष्टमभवन् । प्राचीनथेरवादी इति हीनयानरूपेण बोधिसत्त्ववादी चेति महायानरूपेण उक्तम् । बौद्धधर्मस्य प्रचाराय प्रसाराय च सम्राज: अशोकस्य महतिभूमिका आसीत् । भारते, प्राच्य-पाश्चात्यप्रदेशयो: च बौद्धधर्मस्य प्रचार: प्रसार: चेत्यस्मिन् शोधप्रबन्धे विद्यमान: ।

**कूटशब्द :** हीनयान:, महायान:, वज्रयान:, केन्द्रविन्दु:, बौद्धभिक्षव:, प्रचाराय ।

## प्रस्तावना

पूर्वभारते स्थित: कपिलावस्तुनगरे ई. पू. ५६३ (५६६) वर्षे भगवन् बुद्ध: जात: । तस्य पिता राजा शुद्धोदन: माता च मायादेवी आसीत् । वाल्यकाले स्वमाता मायादेवी पञ्चत्वं गता । विमाता गौतमी सिद्धार्थं पालनमकरोत् । भौतिकपदार्थेषु विलासौपकरणेषु च तस्य मन: न रम्यते । षोडशे वर्षे तस्य विवाह: यशोधरा नाम कन्यया सह अभवत् । तयो: राहुल: नाम पुत्र: अजायत: । एकदा जरां, मृत्युं, दु:खं, अनासक्तानन्दित-सन्न्यासीं च दृष्ट्वा तस्य मन: विचलितमभवत् । अत: स: गृहत्यागस्य मनोस्थिरं कृत्वा एकदा निशायां गृहत्यागं कृत: । बुद्धस्य गृहत्याग: बौद्धधर्मे महाभिनिष्क्रमणमिति नाम्ना ख्यात: । शिक्षालाभाय स वैशाली प्रदेशस्य सांख्यदर्शन-साधकं आलारा कालामां निकषा अगच्छत् । अथ स: राजगृहस्य तपस्वीरुद्रकरामपुत्रात् दीक्षां लभते । किन्तु तस्य मन: न सन्तुष्टमस्ति । तत: स पञ्चभिक्षुभि: सह षट् वर्षं यावत् कृच्छसाधनं कृतवान् । अथ स उरुविल्ल नाम ग्रामे निरञ्जना इति नदीं निकषा स्थित: एकस्य अश्वत्थवृक्षस्य अध: उपविस्य वुद्धत्वस्य परमसत्यस्य चेति ज्ञानं लभते । अत: स लब्धज्ञानस्य प्रचाराय सारनाथमगच्छत् । तत्र स पञ्चभिक्षुभि: सह पुन: साक्षात् कृतवान् । पञ्चभिक्षव: बुद्धं निकषा शिष्यत्वं गृहीतवन्त: । एतत् विषय: बौद्धधर्मे धर्मचक्रप्रवर्तनमिति नाम्ना ख्यात: । तत: स पञ्चशिष्यै: सह वाराणस्यां गत्वा तस्य पत्न्यै मित्राय च दीक्षां प्रददाति स्म । स्वल्पसमये तस्य षष्टि: संख्यका: शिष्या: उत्पादिता: । स शिष्यान् अवदत् – "चरत्थ भिकखवे चारिकं वहुजन हिताय वहुजन सुखाय" । शिष्यान् धर्म प्रचाराय प्रेरणं कृत्वा बुद्ध: राजगृहं गत: । स राजगृहे, दक्षिणागिरौ, कपिलावस्तौ, वैशाल्यां, वाराणस्यां, चम्पायां, कोसाम्ब्यां, पावायां, कुशिनगरे चादि स्थाने उपदेशं प्रदत्त: । बौद्धधर्मस्योऽपि च प्रचारं कृत: । मगधराज विम्बिसार:, सारिपुत्र:, मौद्गल्यायण:, सिगलक:, अनाथपिण्डक:, राजा प्रसेनजित्, विशाखा, जीवक:, आम्रपालि: चादि विशिष्टमनुष्या: बुद्धं निकषा दीक्षाग्रहणं कृता: । अपिच पिता शुद्धोदन:, स्त्री यशोधरा, पुत्र: राहुल:, पालिता माता गौतमी, देवदत्त: चादि दीक्षां अगृह्णन् ।

## उपदेशा:

भगवत: बुद्धस्य उपदेशा: सप्तस्तम्भै: उल्लिखिता: । ये सन्ति –

1. आर्यसत्यचतुष्टयम्
2. अष्टाङ्गिकमार्गम्
3. पञ्चशीलम्
4. इन्द्रियाणां व्यवहारम्
5. ज्ञानस्य सप्त उत्सानि
6. पून्यार्जनस्य उपायचतुष्टयम्
7. शान्त्या: उपायम्

बुद्धस्य मतवाद: विस्तृतरूपेन उपलब्ध: त्रिपिटकग्रन्थे । भगवत: बुद्धस्य जीवत्काले कोऽपि बौद्धधर्मसम्प्रदाय: नासीत् । मनुष्यानां सुमार्गस्य प्रदर्शनं हि भगवत: केवलं लक्ष्यमासीत् । परन्तु भगवत: महापरिनिर्वाणं पश्चात् वहव: सम्प्रदाया: सृष्टमभवन् ।

यस्य मूलकारणं हि बौद्धधर्ममवलम्ब्य भिक्षुकाणां मतभेदम् । एतस्य फलस्वरूपं हि हीनयानं महायानं चेति बौद्धधर्मस्य विभाजम् ।

**हीनयान: महायान: च**

प्राचीन थेरवादी हीनयानरूपेण बोधिसत्त्ववादी च महायानरूपेण उक्त: । श्रीलङ्का-थाइल्याण्ड-मायानमार-कम्बोदिया चादि भारतस्य दक्षिणदिशायां वन्धौ प्रदेशे हीनयानसम्प्रदायस्य प्रचाराय प्रसाराय च श्रीलङ्का हि केन्द्रविन्दु: आसीत् । तृतीयामहासंगीति-अनुष्ठानस्य पश्चात् त्रिपिटकस्य सर्व्वाणि सूत्राणि श्रीलङ्कायां नीतवन्त: । अथ श्रीलङ्कात: असौ धर्म: थाइल्याण्ड मायानमार चादि प्रदेशे विस्तृत:।

महायान सम्प्रदायस्य सृष्टिरभवत् १०० ई. । कोऽपि विद्वानस्य मते अश्वघोष: महायानसम्प्रदायस्य प्रवर्तक: । नागार्जुनाचार्य: महायानसम्प्रदायस्य अन्यतम: आसीत् । महायान सम्प्रदायस्य प्रचारं प्रसारं च बङ्ग:, उडिष्या, आसाम:, उत्तरभारत: चादि प्रदेशत: चीन: तिब्बत: चादि प्रदेशे विस्तारं अलभन् । तत्पश्चात् चीन प्रदेशत: शनै: शनै: महायानसम्प्रदाय: जापान:, कोरिया, मङ्गोलिया, नेपाल:, भियेतनाम: चादि प्रदेशे प्रचारितमभवत् ।

इमौ द्वौ सम्प्रदायौ अन्तरा अनेका: भेदा: सन्ति । तयो: मार्गमपि च स्वतन्त्रम् । हीनयान सम्प्रदाये मोक्ष: हि परमलक्ष्य: । ते गृहस्थसुखं परित्याज्य कृच्छसाधनं हि मोक्षलाभाय केवलं उपायमिति मन्यन्ते । किन्तु महायान सम्प्रदायमते दु:खविनाशेन मोक्षलाभ: भवति । केवलमेकेन लब्धवोधिसत्त्वेन जगत: दु:खं न विनश्यति । किन्तु सर्व्वेण लब्धवोधिसत्त्वेन जगत: दु:खं विनश्यति । अत: मोक्षलाभ: सम्भवति । एतस्य विवादस्य हेतो: सम्प्रदयौ चतु: सभायां मिलितौ । एषा सभा बौद्धधर्मे महासंगीति इति नाम्ना परिचिता ।

**वज्रयान**

वज्रयान: नास्तिक: बौद्धधर्म:- इति सर्वविदितम् । तन्त्रयान:, मन्त्रयान:, मन्त्रनाय:, गुह्यमन्त्रयान:, तान्त्रिकबौद्धधर्म:, गूढबौद्धधर्म: चेति वज्रयानस्य अपरं नाम । अस्य महायान: बौद्धधर्मस्य विकशितरूपम् । वज्रयानीधर्मस्य प्रचार: भगवता बुद्धेन कृत: इति अनुमितं भवति । परन्तु ७०० अथवा ८०० वर्षे भारतवर्षे यदा अनेकानां सिद्धाचार्याणां उत्भवति तदा अस्य धर्मस्य संकेतं परिलक्षितम् । सम्प्रति तिब्बतीबौद्धधर्म: चीनीगूढबौद्धधर्म:, शिंगोनबौद्धधर्म:, नेवारबौद्धधर्म: च इत्यादय: अनेका: बौद्धतान्त्रिकपरम्परा: प्रचलिता: सन्ति ।

**बौद्धधर्मस्य प्रचार: प्रसार: च**

भारतवर्षे बौद्धधर्म विस्तारस्य वृहदितिहास: विद्यमान: । बौद्धधर्मस्य प्रचाराय प्रसाराय च सम्राज: अशोकस्य महतिभूमिका आसीत् । स: प्राक् बौद्धधर्मं राजधर्ममर्यादायां विभूषितम् । अथ स्वपुत्रं महेन्द्रं स्वपुत्रीं च संघमित्रां बौद्धधर्मप्रचाराय प्रेरयति श्रीलङ्कायाम् । तत्पश्चात् श्रीलङ्कायां बौद्धधर्मप्रचार: आरभते । संघमित्रा महेन्द्र: च ४८ वर्षं श्रीलङ्कायां स्थितौ बौद्धधर्मस्य प्रचाराय ।

सम्राजा अशोकेन ८५ सहस्रं बौद्धस्तुपनिर्माणकार्यस्य सिद्धान्तं भवति । स गान्धार:, काश्मीर: च प्रदेशे बौद्धधर्मस्य प्रचाराय महयान्तकं प्रेरयति । एष: गान्धार: वर्तमाने आफगानिस्तानस्य अन्तर्गत: । चीनप्रदेशे छिन राजवंशस्य श्रेष्ठ: राजा मिङ्ती प्राक्-बौद्धधर्मस्य ग्रहणं कृतवान् । राजा मिङ्ती स्वप्ने भगवत: बुद्धस्य दर्शनलाभं कृतवान् । अथ भारतवर्षे त्रय: दूता: प्रेरयन्ति स्म बौद्धभिक्षुनां चीनप्रदेशे आनयनेभ्य: ।

कोरिया प्रदेशे बौद्धधर्म: प्रविशति ३७२ वर्षे । चीनप्रदेशत: एक: भिक्षु: बौद्धधर्मस्य अनेकग्रन्थै: सह कोरिया प्रदेशे आगत: । य: ग्रन्थ: चीनाभाषायामनुदित: । तदा कोरिया स्वतन्त्रराष्ट्रमभवत् । ५०० वर्षे बहव: बौद्धभिक्षव: भारतप्रदेशत: कोरियां गता: । तदा कोरियाप्रदेशस्य राजा आसीत् सोङ इति । नृपस्य सहयोगेन ते कोरियाप्रदेशे बौद्धधर्मस्य प्रचारं कृता: । ५४०-५७५ वर्षे राजा छिनहुङ तस्य शासनकाले बौद्धधर्मस्य प्रचाराय प्रसाराय च मनोनिविष्टं कृत: । तदा बौद्धधर्म: कोरियाप्रदेशत: जापाने प्रसारित: । राजा छिनतुङ तस्य जीवनान्ते बौद्धभिक्षु: अभवत् इति कथित: । उइचोन इति नाम एक: कोरियान भिक्षु: चीने अध्ययनस्य समये ४००० संख्यकानां बौद्धग्रन्थानां संग्रहं कृतवान् ।

जापाने बौद्धधर्मस्य प्रचार: आरभते ५५२ वर्षे यदा कोरियाप्रदेशस्य राजा जापानप्रदेशस्य नृपाय धार्मिक-उपकरणेन सह काँसाधातुनिर्मितं बौद्धमूर्तिं प्रददाति । प्रथमसमये जापानीधर्मेण सह बौद्धधर्मस्य विरोधं भवति तत्पश्चात् शोतोकु इति राजकुमारस्य प्रयत्नेन जापाने बौद्धधर्म: प्रतिष्ठित: । शोतोकु: नृपं भूत्वा बौद्धधर्मं राजधर्मरूपेण स्थापित: । विद्यार्थीं च बौद्धधर्मस्याध्ययनाय कोरिया प्रदेशे प्रेरयति । तेन जापाने बहव: बौद्धविहारा: प्रतिष्ठिता: । तेन सदधर्मपुण्डरीक: विमलकीर्ति: च ग्रन्थयो: टीका रचिता । जापानीबौद्धधर्मस्य इतिहासे राजा शोतोकु इति नाम स्वर्णाक्षरेण लिखित: । ८०० वर्षे जपाने बौद्धधर्म: सम्पूर्णरूपेण विस्तृत: इति कथित: । फलत: अनेके सम्प्रदाया: उत्पन्ना: । यत् – १) तेन्दैसम्प्रदाय:, २) केगोनसम्प्रदाय:, ३) शिंगोनसम्प्रदाय:, ४) जोदोसम्प्रदाय:, ५) निचिरेनसम्प्रदाय:, ६) जैनसम्प्रदाय: ।

नेपालमेव बौद्धधर्मस्य अतीव पवित्रस्थानम् । यस्य कारणं हि – भगवन् बुद्ध: सकृत् नेपाले गतवान् । तत्र स तस्य पुत्रं बौद्धधर्मे दीक्षितं कृतवान् । सम्राट् अशोकोऽपि सकृत् नेपाले गतवान् । नेपालस्य नृप: अंशुवर्मन: बौद्धधर्मस्य अनुरागीमासीत् । स तस्य कन्या राजकुमारीभृकुटिं तिब्बतप्रदेशस्य नृपेण सह विवाहं कारयत: । भृकुटि: तिब्ब्ते बौद्धधर्मस्य प्रचारे अतीव भूमिकां पालयति स्म ।

तिब्बतस्य बौद्धधर्मस्य वर्णनां अतीव प्रयोजनीयम् । इदानीमपि हिमालये बौद्धधर्मस्य नियमा: पालिता: । धर्मगुरु: दलाइलामा तिब्बतप्रदेशस्य अन्यतम: बौद्धधार्मीक: ।

**उपसंहार:**

शनै: शनै: बौद्धधर्मस्य अध:पतनमभवत् । महायानमते यदा निर्वाणस्यार्जनमतीव दुष्करं भवति तदा सहजयानस्य सृष्टमभवत् । सहजयाने विदितम् – जगत् मिथ्या निर्वाणमपि मिथ्या । सर्व्वे नित्यमुक्ता: । पाप: नास्ति पुन्योऽपि च नास्ति । सहजयाने मूर्तिपूजा गुप्तपूजा च दृश्यते । बौद्धधर्मस्य अध:पतने सहजयानस्य अनेका: भूमिका: सन्ति । भारते मुस्लिम-आक्रमणेन बौद्धधर्मस्य प्राय: नाश: अभवत् । एतेषामाक्रमणानां फलस्वरूपं बौद्धभिक्षव: नेपाल-तिब्बतयो: शरणं प्राप्तवन्त: । अत: भारते इसलामधर्मस्य प्रभाव: बौद्धधर्मस्याध:पतनस्य अन्यतमकारणमस्ति ।

**शोध संदर्भ**


1. चौधुरी, डॉ. सुकोमल. गौतम बुद्धेर धर्म ओ दर्शन. कलकाता: महावोधि बुक एजेंसी, २०१४.
2. आंबेडकर, डॉ. भीमराव रामजी. भगवान बुद्ध और उनका धम्म.
3. भट्टाचार्य, समरेन्द्र. भारतीय दर्शनबुक सिण्डिकेट प्राइभेट :कलकाता . लिमिटेड, २०१०.
4. भट्टाचार्य, अध्यापक अमितसंस्कृत बुक :कलकाता .भारतीय दर्शनेर रूपरेखा . डिपो, २००९.